.. rAdhAmAdhavastotram, padmanAbhastotram, yogeshvarI pa nchakam ..

## ॥ राधामाधवस्तोत्रम्, पद्मनाभस्तोत्रम्, योगेश्वरी पञ्चकम् ॥

॥ श्रीगणेशाय नमः ॥

गोविन्दः परमे विशालभुवने गोलोकधामे स्थितः ।
ब्रह्माशङ्करपन्नगप्रभृतिभिः देवैः सदा अर्चितः ॥
ॐकारः पुरुषोत्तमः सुरगुरुः आदिबीजमव्ययम् ।
श्रीकृष्णः नरकेसरी सुरपतिः नारायणः पातु माम् ॥ १॥

गोविन्दजी, जो गोलोकधाम में विशाल निवासस्थान में स्थित हैं; ब्रह्मदेव-शिवजी-नाग (अनन्त,वासुकी, शेष, पद्मनाभ, कंबल, शंखपाल, धृतराष्ट्र, तक्षक, कालिया ये ९ नाग) आदि देवता जिनकी पूजा करते हैं; जो ॐकारस्वरूप, उत्तम पुरुष, देवताओं में सबसे बडे, विश्वका आदि बीज है; वे सिंह जैसे नर, देवताओं के राजा नारायण श्रीकृष्ण मेरी रक्षा करें ।

कोटिसूर्यसमुद्भवं च सकलं वक्त्रे समस्तं जगत् ।
नानादैत्यविनाशकः च भगवान् कालापसुनृत्यकः ॥
गीताशास्त्रप्रभुं सदाशुभकरं वन्दे गुरुं माधवम् ।
योगेशः अनघः धनञ्जयसखा देवेश्वरः पातु माम् ॥ २॥

कोटि सूर्यो से निर्मित हुआ समस्त विश्व जिनके मुख में समाया है(जिसके दर्शन यशोदामाता ने किए थे); जिन्हो ने (बचपन से ही) अनेक दैत्योंका संहार किया; जिन भगवान ने (कालियासर्प की) फन के उपर उत्तम नृत्य किया; जो माधव गीताशास्त्र के निर्माता प्रभू एवं (जगत् के) गुरु हैं; सदा मङ्गल करनेवाले हैं, उनको मै प्रणाम करता हूँ ल् वे अर्जुन मित्र, निष्पाप, योग के ईश्वर, देवताओं के देव मेरी रक्षा करें ।

श्रीकृष्णः भुवनेश्वरः च गुणवान् द्वारावतीरक्षकः ।
शौरिः सर्वजनेश्वरः च नृपतिः देवैः सदा वन्दितः ॥
भक्ताभीष्टवरप्रदः च भगवान् विष्णुः स्थितिकारकः ।
सः मां पातु सदा प्रसन्नवदनः योगेश्वरः नन्दकी ॥ ३॥

श्रीकृष्ण जो सद्गुणोंसे युक्त, (तीन) भुवनोंके ईश्वर, द्वारिकानगरी के रक्षक, शौरी, सकल मानवों के वन्दनीय राजा (इन्द्रादि) देवताओं के पूज्य हैं; भक्तों को इच्छित वर प्रदान करनेवाले पालनकर्ता


From http://sanskritdocuments.org

भगवान विष्णू हैं; वे प्रसन्न मुखवाले, नन्दजी के पुत्र,
योगेश्वर मेरी रक्षा करें ।

विश्वेशः श्रीशः विशालनयनः देवेश्वरः श्रीहरिः ।
कोटिसूर्यसमप्रभं सुवदनं ध्येयं सदा योगिभिः ॥
कृष्णाख्यः परमेश्वरः सुधन्वा यः वंशिकावादकः ।
सः मां पातु सदा सदाशिवसखा गोधामनारायणः ॥ ४॥

वे जो सुधन्वा(नाम से जाने जातें हैं); मुरली बजानेवाले, कृष्ण नाम धारण करनेवाले, परमेश्वर, विश्व के संचालक ईश्वर, लक्ष्मीमाता के पतिदेव, जिनके नयन विशाल हैं; जिनके कोटी सूर्यों जैसे प्रकाशित मुख का ध्यान योगीजन नित्य करते हैं; वे शंकर जी के मित्र, गोलोकमें स्थित देवेश्वर श्रीहरी नारायण सदा मेरी रक्षा करें ।

नानापुष्पविभूषितं तु भुवनं वृन्दावनं काननम् ।
राधाप्राणसखा पिताम्बरधरः त्रैलोक्यसम्पूजितः ॥
राधा कृष्णप्रिया प्रसन्नवदना वामाङ्गभागे स्थिता ।
वन्देषं परं सुमङ्गलप्रदं दिव्यं च संयोजनम् ॥ ५॥

वृन्दावन का निवासस्थान अनेक पुष्पोंसे सुशोभित वन है (जिसमे) त्रिलोकमें पूज्य; राधाजी के प्राणप्रिय मित्र; पीतवस्त्रधारी(भगवान श्रीकृष्ण) हैं; प्रसन्नमुखी कृष्णप्रिया राधाजी(उनके) बाएँ हाथ की ओर स्थित हैं, उस स्वर्गीय; परम मंगलदायी युगुल को मैं (सादर) प्रणाम करता हूँ ।

---

॥ श्रीगणेशाय नमः ॥
॥ अथ श्रीपद्मनाभस्तोत्रम् ॥

महासर्पशय्यां तुरीयां च वृत्तिम् ।
परब्रह्मपूर्णं गुडाकेशकृष्णम् ॥
गदाशङ्खचक्रप्रभापद्मयुक्तम् ।
प्रभुं पद्मनाभं नमामि नमामि ॥ १॥
सुराणां रमेशं गुणानां गणेशम् ।
पद्मावतीपद्मजाप्राणमीशम् ॥



From http://sanskritdocuments.org

स्थितिकारकं सर्वभूतात्मतत्त्वम् ।
सङ्कर्षणस्वामीदेवं स्मरामि ॥ २॥
ॐकारतत्त्वं स्मृतिज्ञानमूर्तिम् ।
ब्रह्माण्डमार्तण्डसामर्थ्यशक्तिम् ॥
महादेवदेवं कृपासिन्धुरूपम् ।
मायाधवं वासुदेवं नमामि ॥ ३॥
क्षुब्धार्णवे चण्डसन्तापग्रस्ताः ।
चतुर्वेदचौर्यं विषण्णः च ब्रह्मा ॥
क्षणे तारकोऽभूत वैकुण्ठराजा ।
विसारावतारं शरणं प्रपद्ये ॥ ४॥
सुरासुरक्रीडा महामन्थनं तत् ।
रत्नानि चित्राणि दिव्यानि तानि ॥
धन्वन्तरि चामृतं कालकूटम् ।
कूर्मावतारं शरणं प्रपद्ये ॥ ५॥
पराभूतशक्रः च नष्टा धरित्री ।
दुष्टासुरः येन क्षणे विनष्टः ॥
वेदान्तज्ञानार्कधारी धराधृक् ।
वराहरूपं शरणं प्रपद्ये ॥ ६॥
हिरण्याक्षभ्राता महाकालग्रस्तः ।
मृत्युप्रभो भो नृसिंह प्रसीद ॥
प्रल्हादसम्राट् तव भक्तश्रेष्ठः ।
भद्रावतारं नृसिंहं नमामि ॥ ७॥
ब्रह्मण्यतत्त्वं धृतं येन काये ।
बलिशीर्षभागे समन्यस्तपादः ॥
वृत्वा त्रैलोक्यं यति अत्यतिष्ठत् ।
प्रभुं वामनं तं नमामि नमामि ॥ ८॥
सहस्रार्जुनो नाम राजाधिराजा ।
जितः तेन युद्धे हतः च तथैव ॥
ब्रह्मण्यदेवं प्रभुं परशुरामम् ।
तं जामदग्न्यं शरणं प्रपद्ये ॥ ९॥
महादेवात्मा धनुर्वेदधारी ।
दशग्रीवनाशी सदाक्षेमकारः ॥
अयोध्यानृपः सूर्यवंशे प्रदीप्तः ।
सीताधवं रामदेवं नमामि ॥ १०॥
नारायणः नीलवर्णः प्रसन्नः ।
कंसद्विषः केशवः चारुदत्तः ॥


From http://sanskritdocuments.org

राधाप्रियं रुक्मिणिप्राणमीशम् ।
कृष्णावतारं हृदि तं स्मरामि ॥ ११॥
चिदानन्दरुपं हरिं शम्भुरुपम् ।
मनुजाकृतिं केशवं विठ्ठलं तम् ॥
मायापतिं च विभुं पाण्डुरङ्गम् ।
प्रबुद्धावतारं नमामि नमामि ॥ १२॥
शुभ्राश्वरुढं महाभीमवीरम् ।
तथा कल्किरुपं प्रसन्नं गभीरम् ॥
गदा तीक्ष्णखड्गं त्रिशूलं च हस्ते ।
तं कल्किरुपं शरणं प्रपद्ये ॥ १३॥
नागाधिराजन् प्रभो विश्वनाथ ।
क्षीराब्धिवास गुरो वासुदेव ॥
क्षोणिधर शेषशायिन् प्रसन्न ।
त्वं पाहि मां देव देव प्रसीद ॥ १४॥

---

॥ श्रीगणेशाय  नमः ॥
योगेशा सुरपूजिता भगवती त्रैलोक्यमन्दाकिनी
देवेशा गिरिजा महेश्वरप्रिया ब्राह्मी महायोगिनी ।
विद्या शान्तिप्रदा तथैव कमला बाला च नारायणी
पुत्रोऽहं नु तवास्मि चारुवदने मातर्प्रसन्ना भव ॥ १॥
आम्राकारमुखं प्रफुल्लकमलं सौभाग्यरेखाङ्कितम्
ताम्बूलं च मुखे प्रसन्नवदनं सिन्दूर आलेपनम् ।
सर्वानर्थहरं सदाशुभकरं अक्ष्णोः प्रद्योतनम्
पुत्रोऽहं नु तवास्मि चारुवदने मातर्प्रसन्ना भव ॥ २॥
मालापद्मधरा चतुर्भुजधरा योगेश्वरी शर्वरी
ध्वान्तशात्रवसर्वलोकजननी माहेश्वरी श्रीकरी ।
नानारुपधरी सदाशुभकरी भूलोकलोकेश्वरी
पुत्रोऽहं नु तवास्मि चारुवदने मातर्प्रसन्ना भव ॥ ३॥
कूष्माण्डा च रमा तथैव च उमा कात्यायनी पार्वती
गायत्री कमलासना भगवती विष्णोः च पद्मावती ।
सावित्री परमा सदाशिवप्रिया कौमारी सा वैष्णवी
पुत्रोऽहं नु तवास्मि चारुवदने मातर्प्रसन्ना भव ॥ ४॥
नानादैत्यविनाशिनी भगवती ब्रह्मण्यरक्षाकरी
वेदानां च सरस्वती भगवती देवी दयासागरी ।



From http://sanskritdocuments.org

सीता रामप्रभोः महापतिव्रता दुर्गा च रामेश्वरी
पुत्रोऽहं नु तवास्मि चारुवदने मातर्प्रसन्ना भव ॥ ५॥

योगेश्वरि जगन्मातः पितः शम्भो महेश्वर ।
रामकृष्णस्य शिष्याय यशः ज्ञानं प्रयच्छतम् ॥

Composed, encoded, proofread by Pushkaraj Uday Vartak pushkarajgem at gmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org